नवमः पाठः
९

# पुष्करमेलापकः

( उपपदविभक्तिः )

(अत्र पवित्रपुष्करमेलापकस्य वर्णनम् अस्ति। मेलापके किं किं भवति कः कथम् आनन्दम् अनुभवति इति वयं पाठेऽस्मिन् जानीमः।)

''उत्सवप्रियो हि लोकः'' भारतीयानां तु प्रतिदिनम् एव यत्र कुत्रचित् उत्सवरूपेण एव भवति। यथा–पर्व, जन्मोत्सवः मेलापकः इत्यादयः। सर्वजनानां प्रियाः चिरप्रतीक्षिताः भवन्ति मेलापकाः।

अतः बहुविधाः भवन्ति मेलापकाः। यथा–विज्ञानपुस्तकमेलापकाः, संस्कृतपुस्तकमेलापकाः, पशुमेलापकाः, धार्मिकमेलापकाः इत्यादयः। राजस्थाने सर्वाधिकप्रियः धार्मिकमेलापकः भवति। तत्र हि सर्वेषाम् आस्थाकेन्द्रं पुष्करतीर्थमेलापकः केषाम् आकर्षणकेन्द्रं नास्ति।



विश्वप्रसिद्धं ब्रह्ममन्दिरम् अत्रैव शोभते। अन्यदपि वराहमन्दिरम्, रङ्गनाथमन्दिरम्, सावित्रीमन्दिरम् इत्यादीनि प्रसिद्धानि मन्दिराणि सन्ति।

प्रतिवर्षं भारतीयपञ्चाङ्गानुसारेण कार्तिकमासस्य शुक्लपक्षे एकादशीतः पूर्णिमातिथिपर्यन्तम् अत्र प्रसिद्ध–मेलापकस्य आयोजनं भवति। कार्तिकमासः पुण्यमासः भवति। मासे यात्रिणः अत्र विद्यमाने पुष्करसरोवरे स्नानं कुर्वन्ति स्वपापानि च नाशयन्ति। अत्र मेलापके बहवः वैदेशिकाः सम्मिलिताः भवन्ति। राजस्थानस्य कलां संस्कृतिं च ज्ञात्वा अभिभूताः भवन्ति। उष्ट्राणां धावनप्रतियोगिता, काष्ठपुत्तलिकानृत्यम्, रज्जुकर्षणस्पर्धा, अश्वसज्जाप्रतियोगिता अत्रत्याः आकर्षणकेन्द्रभूताः रमणीयाः च कार्यक्रमाः सन्ति। कार्यक्रमान् दृष्ट्वा जनाः नितरां प्रमुदिताः भवन्ति। सर्वत्र आपणा एव दृश्यन्ते।

अत्र बहुविधाः आपणाः सन्ति। एकत्र बालेभ्यः बहुविधिक्रीडनकानि मिलन्ति, केचन बालाः क्रीडन्ति, केचन पश्यन्ति, केचन परस्परं चर्चां कुर्वन्ति। क्रीडनकैः क्रीडन्ति अन्ये। पुरुषाः अपूपं खादन्ति। महिलाः वस्त्रापणेषु चित्रवस्त्राणि क्रीणन्ति। केचन कबड्डी स्पर्धां पश्यन्ति। ग्राम्याःकृषकादयः पशून्

क्रीणन्ति विक्रयणं च कुर्वन्ति। रात्रिकाले चन्द्रस्य धवलचन्द्रिकायां सिकतामये प्रदेशे एते कार्यक्रमाः सर्वेभ्यः आह्लादकराः भवन्ति।

अनेन प्रकारेण पवित्रपुष्करतीर्थराजः भारते एव नहि अपितु अन्ताराष्ट्रियस्तरे जनानां आस्थायाः केन्द्रम् अस्ति।

## शब्दार्थः

| शब्दः | सरलार्थः | हिन्दी अर्थ |
|---|---|---|
| मेलापकः | मेला | मेला |
| कुत्रचित् | कस्मिंश्चित् स्थाने | किसी स्थान पर |
| चिरप्रतीक्षिताः | बहुप्रतीक्षिताः | अधिक समय से प्रतीक्षित |
| शोभते | सुशोभितं भवति | सुशोभित होता है। |
| एकादशीतः | एकादशीतिथेः आरभ्य | एकादशी से लेकर |
| अभिभूताः | आश्चर्यचकिताः | आश्चर्य चकित |
| वैदेशिकाः | विदेशवासिनः | विदेश में रहने वाले |
| काष्ठपुत्तलिकाः | काष्ठनिर्मितां पुत्तलिकाः | कठपुतलियाँ |
| रज्जुकर्षणम् | रज्जुकर्षणः प्रतियोगिता विशिष्टा | रस्सी को खींचने की प्रतियोगिता |
| प्रमुदिताः | प्रसन्नाः | प्रसन्नचित्त |
| नितराम् | अत्यधिकम् | अत्यधिक |
| आपणाः | वस्तुविक्रयणस्थानानि | दुकाने |
| क्रीणन्ति | क्रयणं कुर्वन्ति | खरीददारी करते है। |
| स्पर्धा | प्रतियोगिता | प्रतियोगिता |
| सिकतामये | बालुकायुक्ते | रेतयुक्त |
| आह्लादकराः | प्रीतिकारकाः | प्रसन्न करने वाले |

## अभ्यासः

१. **निम्नपदानां उच्चारणं कुरुत –**

बहुविधप्रकारकाः, द्विपञ्चाशत्, पञ्चाङ्गानुसारेण, उष्ट्राणाम्, काष्ठपुत्तलिका, बहुविधक्रीडनकानि, वस्त्रापणेषु, धवलचन्द्रिकायाम्, आह्लादकराः, अन्ताराष्ट्रियः।

२. **निम्नलिखितप्रश्नान् एकपदेन उत्तरत -**

(क) सर्वजनानां चिरप्रतीक्षिताः के भवन्ति ?

(ख) राजस्थाने सर्वाधिकः प्रियः कः मेलापकः भवति ।

(ग) विश्वप्रसिद्धं ब्रह्ममन्दिरं कुत्र अस्ति ?

(घ) कस्मिन् मासे पुष्करे मेलापकः आयोजितः भवति ।

(ङ) पुष्करमेलापके बहवः के सम्मिलिताः भवन्ति ।

३. **निम्नलिखितप्रश्नान् एकवाक्येन उत्तरत -**

(क) महिलाः वस्त्रापणेषु किं क्रीणन्ति ?

(ख) वैदेशिकाः राजस्थानस्य कां ज्ञात्वा अभिभूताः भवन्ति ?

(ग) मेलापके काः प्रतियोगिताः भवन्ति ?

(घ) मेलापके बालाः किं किं कुर्वन्ति ?

(ङ) कार्यक्रमाः सर्वेभ्यः कदा आह्लादकराः भवन्ति ?

४. **मञ्जूषातः उचितं शब्दं चित्वा रिक्तस्थानं पूरयत -**

| |
|---|
| आह्लादकराः, सरोवरे, प्रमुदिताः, पुण्यमासः, चिरप्रतीक्षिताः |

(क) यात्रिणः ....................स्नानं कुर्वन्ति ।

(ख) सर्वजनानां प्रियाः ..................................भवन्ति मेलापकाः ।

(ग) कार्तिकमासः ..................................अस्ति ।

(घ) कार्यक्रमं दृष्ट्वा जनाः नितरां ........................भवन्ति।

(ङ) कार्यक्रमाः सर्वेभ्यः.......................... भवन्ति।

५. **रेखाङ्कितपदानि अधिकृत्य प्रश्ननिर्माणं कुरुत -**

(क) राजस्थाने <u>सर्वाधिकप्रियः</u> धार्मिकमेलापकः भवति।

(ख) विश्वप्रसिद्धं ब्रह्ममन्दिरम् <u>अत्रैव</u> शोभते।

(ग) मेलापके बहवः <u>वैदेशिकाः</u> सम्मिलिताः भवन्ति।

(घ) पुष्करसरोवरे स्नानं कुर्वन्ति <u>स्वपापानि</u> च नाशयन्ति।

(ङ) राजस्थानस्य <u>कलां</u> ज्ञात्वा अभिभूताः भवन्ति।

**६. 'क' स्तम्भे विशेषणपदानि सन्ति 'ख' स्तम्भे विशेष्यपदानि दत्तानि सन्ति। तयोः परस्परं यथोचितं मेलनं कुरुत -**

| | (क) | (ख) |
|---|---|---|
| (क) | चिरप्रतीक्षिताः | जनाः |
| (ख) | विश्वप्रसिद्धम् | धार्मिकमेलापकः |
| (ग) | पुण्यमासः | मेलापकाः |
| (घ) | प्रमुदिताः | कार्तिकमासः |
| (ङ) | सर्वाधिकप्रियः | ब्रह्ममन्दिरम् |

**७. विलोमपदानि लिखत -**

(क) अधार्मिकः ..........................

(ख) आस्था ..........................

(ग) पुण्यानि ..........................

(घ) दिनम् ..........................

(ङ) प्रसिद्धम् ..........................

**८. कोष्ठके प्रदत्तशब्दस्य समुचितरूपेण वाक्यस्य पूर्तिं कुरुत -**

**यथा**- जलम् विना - जलेन विना जीवनं नास्ति। (जलम्)

(क) ................................. विना तृप्ति न भवति। (ज्ञानम् )

(ख) वृद्धः .................................विना न पश्यति। (उपनेत्रम्)

(ग) अधिकारी ...............विना कार्यालयं न गच्छति। (कारयानम्)

(घ) छात्रः .....................विना विद्यालयं न गच्छति। (पुस्तकानि)

**९. कोष्ठके प्रदत्तशब्दस्य समुचितरूपेण वाक्यस्य पूर्तिं कुरुत -**

**यथा** - नरेन्द्रः मित्रेण सह विपणिं गच्छति।

(क) छात्रः ............................सह चर्चां करोति। (शिक्षकः)

(ख) कृषकः .........................सह वार्तां करोति। (आपणिकः)

(ग) पुत्री .......................... सह उद्यानं गच्छति। (जनकः)

## १०. कोष्ठके प्रदत्तशब्दस्य उचितविभक्तिरूपं लिखत -

(क) ................ अभितः वाहनानि सन्ति । (मार्गः)

(ख) ................ अभितः अजाः सन्ति। (वृक्षः)

(ग) ................ अभितः क्षेत्राणि सन्ति। (पवर्तः)

## ११. कोष्ठके प्रदत्तशब्दस्य उचितविभक्तिरूपं लिखत -

(क) ...................परितः जनाः सन्ति। (उष्ट्रः)

(ख) .................. परितः वृक्षाः सन्ति। (कूपः)

(ग) ................. परितः जलम् अस्ति। (ग्रामः)

## १२. कोष्ठके प्रदत्तशब्दस्य समुचितरूपेण प्रयुज्य वाक्यम् रचयत -

| | | | | |
|---|---|---|---|---|
| **यथा-** | अधिकारी | - | (कार्यालयः) | अधिकारी कार्यालयं प्रति गच्छति। |
| (क) | माता | - | (मन्दिरम्) | ..................................... |
| (ख) | चिकित्सकः | - | (चिकित्सालयः) | ..................................... |
| (ग) | अधिकारी | - | (कार्यालयः) | ..................................... |
| (घ) | भगिनी | - | (अध्ययनकक्षः) | ..................................... |

## योग्यता-विस्तारः

### १. चित्रं दृष्ट्वा उपपदविभक्तिं ( अभितः ) जानीत -



**उष्ट्रम् अभितः** जलम् अस्ति।

२. चित्रं दृष्ट्वा उपपदविभक्तिं ( परितः ) जानीत -



**कृष्णं परितः** गोपालकाः सन्ति

३. चित्रं दृष्ट्वा उपपदविभक्तिं ( प्रति ) जानीत -



महिला **कूपं प्रति** गच्छति ।



सिंहः **नदीं प्रति** गच्छति ।

४. वर्णानां संयोजनम् इति सन्धि भवति -

यत्र व्यञ्जनानां मेलनं भवति सः व्यञ्जनसन्धिः भवति। उदा. - तत् + लीनः = तल्लीनः

**जश्त्व-सन्धिः** - वर्गस्य प्रथमद्वितीयतृतीयचतुर्थवर्णेभ्यः परे तृतीयचतुर्थवर्णाः भवन्ति अथवा प्रथमद्वितीयतृतीयचतुर्थवर्णाः पदान्ते भवन्ति चेत् एतेषां स्थाने वर्गस्य तृतीयवर्णाः भवन्ति।

| | | | | | |
|---|---|---|---|---|---|
| रामात् | - | रामाद् | चित्+आनन्दः | - | चिदानन्दः |
| जगत्+ईशः | - | जगदीशः | सत्+विचारः | - | सद्विचारः |

५. **राजस्थानस्य प्रमुखाः केचन मेलापकाः सन्ति तान् वयं जानीमः -**

| मेलापकाः | | स्थानम् |
|---|---|---|
| खेजडली शहीद मेला | - | खेजड़ली (जोधपुर) |
| शीतला माता मेला | - | शील की डूँगरी (चाकसू, जयपुर) |
| भर्तृहरि मेला | - | भर्तहरि (अलवर) |
| फूलडोल का मेला | - | रामद्वारा (शाहपुरा-भीलवाड़ा) |
| डिग्गी कल्याण जी का मेला | - | डिग्गी मालपुरा (टोंक) |
| तीर्थराज मेला | - | मचकुण्ड (धौलपुर) |
| गणेश जी का मेला | - | रणथम्भौर (सवाई माधोपुर) |
| कैलादेवी मेला | - | कैलादेवी (करौली) |
| खाटू श्याम जी का मेला | - | खाटू श्याम जी (सीकर) |
| ऋषभदेव मेला | - | ऋषभदेव (धुलेव उदयपुर) |
| सालासर बालाजी मेला | - | सालासार-(सुजानगढ-चूरू) |
| दशहरा मेला | - | कोटा |
| कल्पवृक्ष मेला | - | मांगलियावास (अजमेर) |
| कजली तीज का मेला | - | बूंदी |
| डाडा पम्पाराम का मेला | - | पम्पाराम का डेरा विजय नगर (गंगानगर) |
| भूरिया बाबा मेला | - | गौतमेश्वर (सिरोही) |
| गोगा नवमी का मेला | - | गोगामेड़ी (हनुमानगढ़) |
| रामदेवरा का मेला | - | रामदेवरा, रुणेचा (जैसलमेर) |
| जम्भेश्वर मेला | - | मुकाम (बीकानेर) |
| मानगढ धाम मेला | - | मानगढ धाम (बाँसवाड़ा) |
| बेणेश्वर | - | बेणेश्वर, सावला (डूँगरपुर) |
| नाकोड़ा जी का मेला | - | नाकोड़ा तीर्थ (मेवानगर बाड़मेर) |
| कपिल मुनि का मेला | - | कोलायत (बीकानेर) |